# संस्कृतम्

# EDUMATE

XII

## SANSKRIT
## Second Language

Government of Kerala
DEPARTMENT OF EDUCATION

*Prepared by*

**State Council of Educational Research and Training (SCERT), Kerala**

**2017**

Vidyabhavan, Poojappura, Thiruvananthapuram Kerala-695 012.
Website: www.scert.kerala.gov.in
e-mail : scertkerala@gmail.com

*Prepared by:*
State Council of Educational
Research & Training (SCERT)
Poojappura, Thiruvananthapuram -12,
Kerala. E-mail:scertkerala@gmail.com

*Type setting by:*
SCERT Computer Lab.

©
Government of Kerala
Education Department
2017

## *आमुखम्।*

नवीनपाठ्यचर्यानुसारिणी पठनप्रवर्तनानि युष्माकं परिचितानि किल? निरीक्षणं, साजात्यवैजात्यविवेचनं, तारतम्यं, वर्गीकरणम्, उपसंग्रहणं, प्रश्नापग्रथनम् इत्यादिभिः निगमनरूपवत्करणम्, आशयरूपवत्करणं च प्रमुखं कार्यम्। पठनप्रवर्तनैः चिन्तानैपुण्याः प्रवर्धनं दृढीकरणं च उद्दिष्टम्। एवं रूपीकृतान्याशयानि नवीनावसरेषु प्रयोक्तुं छात्राः समर्थाः भवेयुः। मूल्यनिर्णयप्रवर्तनेषु प्रधानतया छात्राणां चिन्तानैपुणी प्रवर्धकानां प्रश्नानाम् अवसरम् अवश्यं दातव्यम्। केवलं हृदिस्थानां प्रश्नानामाधिक्यं पठनप्रक्रियायाः अन्तःसत्ताम् ऊनीकुर्यात्। अस्मिन् प्रश्नसञ्चये विविधाः नवीनाः प्रश्नमातृकाः दत्ताः सन्ति। एतस्याः अभ्यासः छात्राणां बहूपकारकः भवेत्। परिष्कृतस्य अस्य ग्रन्थस्य सम्यगुपयोगः छात्राणां पठनं आनन्ददायकं कर्तुं प्रभवेत् इत्याशास्ये।

शुभाशंसाः।

**डा.जे.प्रसादः**
**निदेशकः**
**राज्यशैक्षिकानुसन्धानप्रशिक्षणपरिषद्, केरलम्।**

# Contents

एककम् - I - आर्द्रता ।

एककम् – II - मानविकता ।

एककम् – III - चारुता ।

एककम् - IV - निपुणता ।

# विषयानुक्रमणिका।

• पठनाधिगमाः

## प्रश्नसञ्चयः।

### एककम् - I - आर्द्रता।

१. तव विरहे...।

२. व्रज हरितम्।

३. भविष्ये तव...।

### एककम् – II - मानविकता।

१. चिन्तारतो बालकः।

२. को हेतुः?

३. दीनदयालुर्भव।

### एककम् – III – चारुता।

१. कालातिवर्तिनी कला।

२. कृष्णशिलासु लास्यम्।

३. सुघटिता भाषा।

### एककम् - IV - निपुणता।

१. निर्ममो योजकः।

२. कुशलिनः सन्तु सर्वदा।

३. मन एव बलीयत्।

# पठनाधिगमाः ।

## LEARNING OUTCOMES

१. गीतम् आलपति ।
२. क्रियाविशेषणानां पट्टिकां करोति ।
३. आशयमधिकृत्य टिप्पणीं लिखति ।
४. प्रस्तुताप्रस्तुतानि पट्टिकारूपेण लिखति ।
५. आस्वादनटीकां लिखति ।
६. कथां भावात्मकतया वाचयति ।
७. प्रकृतिप्राणिनां परस्परपूरकत्वमधिकृत्य चर्चां करोति ।
८. पाठभागं पठित्वा प्रश्नानाम् उत्तराणि लिखति ।
९. कथासंभाषणरूपेण परिवर्त्य लिखति ।
१०. प्रकृतेः महत्वप्रदिपादकानि सूक्तिं सञ्चिनोति ।
११. कथयाः आस्वादनटीकां रचयति ।
१२. नूतनीम् एकां पटकथां लिखति ।
१३. पटकथानुसारम् आस्वादनटीकां लिखति ।
१४. अन्यानाम् आर्द्रतां प्रत्यभिजानाति ।
१५. कथा भवात्मकतया अवतारयति ।
१६. बुद्धदेवस्य सन्देशान् विशदयति ।
१७. अनुदितसाहित्यकृतीनां पट्टिकां लिखति ।
१८. पाठभागं लघुनाटकरूपेण कक्ष्यायाम् अवतारयति ।
१९. गद्यभागं भाषान्तरीकृत्य लिखति ।
२०. श्रीनारायणगुरोः सन्देशान् विशदयति ।
२१. अव्ययपदान्युपयुज्य वाक्यानि रचयति ।

२२. श्रीनारायणगुरोः जीवनचरितं लिखति ।

२३. समानपदान्युपयुज्य पाठभागं पुनर्लिखति ।

२४. संश्लिष्टपदानि विश्लेषयति ।

२५. कूटियाट्टम् अधिकृत्य टिप्पणीं लिखति ।

२६. प्रशनवाक्यानि रचयति ।

२७. साक्षात्कारं करोति ।

२८. कोणार्क् मन्दिरस्य विशेषतां विशदयति ।

२९. भारतीयशास्त्रपारम्पर्यमधिकृत्य चर्चते ।

३०. भूतकालार्थे वाक्यं परिवर्तयति ।

३१. ह्रस्वयात्राविवरणं लिखति ।

३२. संगणकीयभाषाविज्ञाने संस्कृतस्य प्राधान्यं विवृणोति ।

३३. संस्कृतस्य सुघटितत्वं प्रति चर्चते ।

३४. संस्कृतस्य महत्वमधिकृत्य टिप्पणीं लिखत ।

३५. विवधानि प्रबन्धनतन्त्राणि क्रोडीकरोति ।

३६. नाटकांशं कथारूपेण परिवर्त्य लिखति ।

३७. भगवद्गीतामधिकृत्य चर्चते ।

३८. प्रबन्धननैपुणीमधिकृत्य टिप्पणीं लिखति ।

३९. नैपुण्यप्रवर्धकोपायान् क्रोडीकरोति ।

४०. गीताश्लोकान् कक्ष्यायामवतारयति।

४१. जीवनसन्दर्भेषु श्लोकानामाशयं समाव्येश्य अवतारयति ।

४२. योगस्य प्राधान्यं विशदयति ।

४३. योगशास्त्रमधिकृत्य चर्चते ।

४४. योगाभ्यासमधिकृत्य लघुटिप्पणीं लिखति ।

४५. एकाग्रतावर्धनाय योगाभ्यासं कक्ष्यायां करोति ।

एककम्
1

# आर्द्रता।

१. तव विरहे...।

२. व्रज हरितम्।

३. भविष्ये तव...।

# १. तव विरहे...।

I **सामान्यनिर्देशः** ........ इष्टतमं गीतं चित्वा आस्वादनटीकां लिखत।

II **पठनाधिगमः** ........ गीतस्य आशयं लिखति।

III **चिन्तानैपुणी** ........ कार्यकारणबन्धम् अवगच्छति।

**प्रश्नपाठः**

**इष्टतमं गीतं चित्वा आस्वादनटीकां लिखत।** **(8)**

आस्वादन**टीकारचनावसरे** सूचका स्वीकरणीयाः ।

१) श्रीजयदेवभणितमिति गीतम्।

सुखयतु केशवपदमुपनीतम्।।

२) हरिरिति हरिरिति जपति सकामम्।

विरहविहितमरणेव निकामम्।।

३) सरसमसृणमपि मलयजपङ्कम्।

पश्यति विषमिव वपुषि सशङ्कम्।।

**सूचकाः**- आमुखम्, आशयं, आस्वादनम्।

**समयः -** 5 निमेषाः।
**मूल्यनिर्णयसूचकाः - इष्टतमगीतलेखनाय -** 2 अङ्कौ।
**एकैकसूचनानुसरणम् आस्वादनटीका लेखनाय** 6 अङ्काः ।
**आहत्य** 2+6=8

I **सामान्यनिर्देशः ........** कोष्ठकात् उचितमुत्तरं निर्धार्य लिखत।

II **पठनाधिगमः ........** प्रश्नानाम् उत्तराणि लिखति।

III **चिन्ताप्रक्रिया ........** उचितमुत्तरविवेचनं करोति । परिचितविषयम् अनुस्मरति।

**प्रश्नपाठः :-**

## कोष्ठकात् उचितमुत्तरं निर्धार्य लिखत।

१. गीतगोविन्दस्य कर्ता कः ? (1)

( जयदेवः , वेदव्यासः , माघः )

**समयः - १** निमेषः ।

**मूल्यनिर्णयसूचकाः - उचितोत्तर लेखनाय - १** अङ्कः ।

२. गीतगोविन्दे कति सर्गाः सन्ति ? (1)

( एकदश , द्वादश , दश )

३. जयदेवः कस्मिन् देशे जनिमलभत ? (1)

( मङ्गलदेशे , वङ्गदेशे , केरलदेशे )

४. केरलीयसंगीतशाखा भवति । (1)

( कर्णाटकसंगीतम् , सोपानसंगीतम् , वीणागीतम् )

५. मलयजपङ्कं विषमिव पश्यति । का ? (1)

( राधा , सखी , शारिका )

६. सा भारं मनुते । किम् ? (1)

( हारम् , पुष्पम् , अव्रतंसम् )

७. विरहविहितमरणा - का ? (1)

( सीता , राधा , प्रियसखी )

८. बालशशिनमिव सायमलोलम् । का ? (1)

( गोपिका , कृष्णा , मीरा )

९. श्रीजयदेवभणितमिति गितम् । किम् ? (1)

( गीतगोविन्दम् , श्रीकृष्णविलासम् , क्रिस्तुभागवतम् )

१०. राधा कथं हरिरिति हरिरिति जपति ? (1)

( सकामम् , सदाहम् , सस्नेहम् )

| | | | |
|---|---|---|---|
| I | **सामान्यनिर्देशः** | ........ | **उदाहरणानुसारं विश्लेषयत।** |
| II | **पठनाधिगमः** | ........ | **संश्लिष्टपदानि विश्लेष्याति।** |
| III | **चिन्तानैपुणी** | ........ | **आशयान् अवगतविषयांश्च नूतनसन्दर्भे प्रयुङ्क्ते** |

**प्रश्नपाठः**

**उदाहरणानुसारं विश्लेषयत।** (5)

- ❖ तापोऽपि = तापः + अपि।
- ❖ कन्दर्पेऽपि = ............................+..........................।
- ❖ कापि = का + अपि।
- ❖ सापि = .....................+...................।
- ❖ कृशतनुरिव = कृशतनुः + इव।
- ❖ हरिरिति = ..................+...................।
- ❖ सरसमसृणमपि = सरसमसृणम् + अपि।
- ❖ नयनविषयमपि = ...................+..................।
- ❖ नयननलिनमिव = नयननलिनम् + इव।
- ❖ प्रालशशिनमिव = ...................+.................।

**समयः -** एकैक निमेषाः।

**मूल्यनिर्णयसूचकाः - उचितपदविश्लेषणस्य कृते -** एकैक अङ्कः।

**आहत्य -** 5x 1=5

| | | | |
|---|---|---|---|
| I | **सामान्यनिर्देशः** | ........ | **यथोचितं योजयत।** |
| II | **पठनाधिगमः** | ........ | **प्रस्तुताप्रस्तुतानि पट्टिकारूपेण लिखति।** |
| III | **चिन्तानैपुणी** | ........ | **परिचितविषयम् अनुस्मरति।** |

प्रश्नपाठः :- **यथोचितं योजयत।** (5)

| **क** | | **ख** |
|---|---|---|
| आवासः | - | विषम् |
| राधा | - | यमः |

| | | |
|---|---|---|
| मलयजपङ्कजम् | - | विपिनम् |
| कन्दर्पः | - | जाला |
| प्रियसखीमाला | - | हरिणी |

**समयः -** ५ निमेषः।

**मूल्यनिर्णयसूचकाः - उचितमुत्तरस्य -** एकैकाङ्काः ।

**आहत्य** 5 x 1=5

**I सामान्यनिर्देशः** ........ **इष्टतमं गीतं चित्त्वा सकारणं लिखत।**

**II पठनाधिगमः** ........ **गीतस्य आशयं लिखति।**

**III चिन्तानैपुणी** ........ **आशायान् अवगतविषयांश्च नूतनसन्दर्भे प्रयुङ्क्ते।**

## प्रश्नपाठः

अधोदत्तेषु भवतः इष्टतमं **गीतं** किं इति सकारणं लिखत। (5)

(१) त्यजति न पाणितलेन कपोलम्।

बालशशिनमिव सायमलोलम्।।

(२) दिशि दिशि किरति सजलकणजालम्।

नयननलिनमिव विगलितनालम्।।

(३) नयनविषयमपि किसलयतल्पम्।

कलयति विहितहुताशनकल्पम्।।

**समयः -** 8 निमेषाः।

**मूल्यनिर्णयसूचकाः -गीतस्य चयनाय -** 2 अङ्कौ।

**कारणलेखनाय -** 3 अङ्काः ।

**आहत्य** 2 + 3=5

**I सामान्यनिर्देशः** ........ **पदानि विश्लेषयत।**

**II पठनाधिगमः** ........ **संश्लिष्टपदानि विश्लेषयति।**

**III चिन्तानैपुणी** ........ **सयुक्तिकं चिन्तयति।**

## प्रश्नपाठः

### उदाहरणं

| | | |
|---|---|---|
| तापोऽपि | = | तापः + अपि। |
| कन्दर्पोऽपि | = | ....................+......................। |
| कापि | = | का + अपि। |
| सापि | = | ....................+......................। |

### उदाहरणं

| | | |
|---|---|---|
| तापोऽपि | = | तापः + अपि। |
| कन्दर्पोऽपि | = | ....................+......................। |
| कापि | = | का + अपि। |
| सापि | = | ....................+......................। |

**समयः -** २ निमेषौ।

**मूल्यनिर्णयसूचकाः - एकैकस्य उचितोत्तरस्य -** एकैकः अङ्कः ।

**आहत्य** 1 + 1=2

| | | | |
|---|---|---|---|
| I | **सामान्यनिर्देशः** | ........ | **कोष्ठकात् उचितमुत्तरं निर्धार्य लिखत।** |
| II | **पठनाधिगमः** | ........ | **प्रश्नानाम् उत्तराणि लिखति।** |
| III | **चिन्तानैपुणी** | ........ | **परिचितविषयमनुस्मरति।** |

## प्रश्नपाठः 1

कोष्ठकात् उचितमुत्तरं निर्धार्य लिखत।

**जयदेवः कस्मिन् देशे जनिमलभत ?**

**( मङ्गलदेशे , वङ्गदेशे , केरलदेशे )**

**समयः -** २ निमेषौ।

**मूल्यनिर्णयसूचकाः - उचितोत्तरस्य -** एकः अङ्कः ।

# २. व्रज हरितम् ।

I **सामान्यनिर्देशः** ........ कोष्ठकात् उचितमुत्तरं निर्धार्य लिखत।

II **पठनाधिगमः** ........ पाठभागं पठित्वा प्रश्नानाम् उत्तराणि लिखति।

III **चिन्तानैपुणी** ........ परिचितविषयम् अनुस्मरति।

**प्रश्नपाठः** (2)

**कोष्ठकात् उचितमुत्तरं निर्धार्य लिखत।**

१. एषः सर्वदा अस्मान् परित्रातुं व्यग्रः आसीत् । एषः कः ?

(वृक्षः, व्याघ्रः, सर्पः)

**समयः -** 2 निमेषौ।

**मूल्यनिर्णयसूचकाः -उचितोत्तरस्य कृते -** 1 अङ्कः ।

I **सामान्यनिर्देशः** ........ प्रदत्तं गद्यभागं पठित्वा प्रश्नान् उत्तरयत।

II **पठनाधिगमः** ........ पाठभागं पठित्वा प्रश्नानाम् उत्तराणि लिखति।

III **चिन्तानैपुणी** ........ गद्यकाव्यं पठित्वा आशयं अवगच्छति।

**प्रश्नपाठः–** प्रदत्तं गद्यभागं पठित्वा प्रश्नान् उत्तरयत। (3)

मातुः पक्षान्तः निद्रासुखमनुभूयमान वयं यथाकथञ्चित् सुप्तोत्थिताः। पितरौ भोजनमन्विष्य गतौ। तयोः आगमनकालं यावत् वृक्ष एव पितरौ। स अस्मान् पोतकानिव संरक्षति स्म।

मम अनुजानं शब्दं श्रुत्वा एव नीडात् बहिरागता। वृक्षस्य अधः तण्डूलान् प्रसृतान् यदृच्छया अपशयम्। तण्डूलान् आहर्तुम् उद्युक्तायां हा हतोऽस्मि इति रूदितमश्रौषम्। वृक्षस्य एका शुष्कशाखा कस्यचित् जालधारिणः लुब्धकस्य शिरसि अपतत् इव।

गद्यांशे विद्यमानानि क्त्वान्त -ल्यबन्त - तुमुन्नन्त पदानि चित्वा लिखत। (1x3=3)

१. कौ भोजनमन्विष्य गतौ?

२. वृक्षस्य अधः किम् अपश्यत्?

३. हा हतोस्मि। इति रुदितमश्रौषम्। कः रोदिति?

४. उदाहरणानुसारं पदं विश्लेषयत।

उदाः- हरिरत्र - हरिः + अत्र।

अप्रहिरागता -.........+.........।

**समयः -** 10 निमेषाः ।

**मूल्यनिर्णयसूचकाः -उचितोत्तरस्य कृते -** 1 अङ्कः ।

**आहत्य** 4 x 1=4.

| | | | |
|---|---|---|---|
| **I** | **सामान्यनिर्देशः** | **........** | **संभाषणं पूरयत।** |
| **II** | **पठनाधिगमः** | **........** | **कथां सम्भाषणरूपेण परिवर्त्य लिखति।** |
| **III** | **चिन्तानैपुणी** | **........** | **गद्यकाव्यं पठित्वा आशयम् अवगच्छति।** |
| | | | **आशयान् धारणाश्च रूपवतकरोति** |

**प्रश्नपाठः :- संभाषणं पूरयत।** (6)

माता - पुत्रि! शरिके!

शरिका - ............................

माता - कुतः त्वं भीता?

शारिका - ............................

माता - लुब्धक इति? कः सर्वान् अरक्षत्।

शारिका - ............................

माता - वृक्षराजं सधन्यवादं प्रणमामः।

**समयः -** 5 निमेषाः ।

**मूल्यनिर्णयसूचकाः - एकैकम् उचितोत्तरस्य कृते -** 2 अङ्कौ ।

**आहत्य** 3 x 2=6

**I सामान्यनिर्देशः ........ कथास्तम्भं पाठभागानुसारं क्रमीकुरु।**

**II पठनाधिगमः ........ कथां भावात्मकतया वाचयति (लिखति) ।**

**III चिन्तानैपुणी ........ परिचितविषयमनुस्मरति।**

## प्रश्नपाठः

**प्रदत्तं कथास्तम्भं पाठभागानुसारं क्रमिकुरुत।** (5)

१) किन्तु अहं कुत्रापि न गच्छामि।

२) यद्यपि अहं रक्षिता तथापि विषबाधितः अयं वृक्षः क्रमेण नाशोन्मुखोऽभवत्।

३) वृक्षस्य अधः कोटरवासी कश्चन सर्पः व्याधस्य पादयोरन्तरेण **झटिति** अस**र**त्।

४) एतं वृक्षं त्यक्त्वा मम बान्धवाः पक्षिण**श्च** सर्वे गताः।

५. विगलितलक्ष्यस्य व्याधस्य शरेण वृक्षः विद्धः ।

**समयः -** 8 निमेषाः ।

**मूल्यनिर्णयसूचकाः - पूर्णतया क्रमीकृतोत्तरस्य कृते -** 5 अङ्काः

**I सामान्यनिर्देशः ........ गद्यं पठित्वा पटकथारूपेण लिखत।**

**II पठनाधिगमः ........ नूतनम् एकां पठकथां लिखति।**

**III चिन्तानैपुणी ........ सृजनात्मकतया चिन्तयति।**

## प्रश्नपाठः

**कथाभागं पठित्वा पटकथारूपेण परिवर्त्य लिखत।** (5)

"भवन्तः गच्छन्तु नाहमधुना आगच्छामि। अस्य दयनीयाम् अवस्थां विचिन्त्य कथमेतं त्यक्त्वा गन्तुं शक्नुमः? एषः सर्वदा अस्मान् परित्रातुं व्यग्रः आसीत्।तत्सर्वं विस्मृत्य आपदि एतम् अनादृत्य गन्तुं नाहं समर्था।गच्छन्तु सर्वे गच्छन्तु। सगद्गदं पुनः पुनः विलपन्ती अन्येषां गमनं सास्रं पश्यन्ती तमेव गाढमाश्लिष्य...."।

समयः - 10 निमेषाः।

मूल्यनिर्णयसूचकाः - कथातः पटकथा लेखनाय - 5 अङ्काः।

I **सामान्यनिर्देशः** ........ समानार्थकपदानि चित्वा लिखत
II **पठनाधिगमः** ........ पाठभागं पठित्वा प्रश्नानाम् उत्तराणि लिखति
III **चिन्तानैपुणी** ........ सयुक्तिकं चिन्तयति।

## प्रश्नपाठः

अधोरेखाङ्कितस्य पदस्य स्थाने समानार्थपदं चित्वा वाक्यं पुनर्लिखत। (1)

१. प्रातः निर्झर्याः कलरवं श्रुत्वा अहं अनृत्यत्।

( लतायाः , नद्याः , पर्वतस्य )

समयः - २ निमेषौ।

मूल्यनिर्णयसूचकाः - उचितोत्तरस्य लेखनाय - 1 अङ्कः।

I **सामान्यनिर्देशः** ........ गद्यभागं पठित्वा रेखाङ्कितपदान्यधिकृत्य प्रश्नान् लिखत।
II **पठनाधिगमः** ........ गद्यभागं पठित्वा आशयम् अवगच्छति।
III **चिन्तानैपुणी** ........ आशयावबोधः प्रश्ननिर्माणकौशलम्।

## प्रश्नपाठः

गद्यभागं पठित्वा रेखाङ्कितपदान्यधिकृत्य प्रश्नान् लिखत। (6)

नाहं गच्छामि, नाहं गच्छामि, भवन्तं विहाय नाहं कुत्रापि गच्छामि ।शारिका वदति। मातुः पक्षान्तः निद्रासुखमनुभूयमानाः वयं यथाकथञ्चित् सुप्तोत्थिताः। पितरौ भोजनमन्विष्य गतौ ।तयोः आगमनकालं यावत् वृक्ष एव पितरौ। स अस्मान् पोतकानिव संरक्षति स्म।

समयः - 5 निमेषाः।

मूल्यनिर्णयसूचकाः - रेखाङ्कितपदान्यधिकृत्य प्रश्ननिर्माणे 2 अङ्कौ देयौ।

अङ्काः - 3x2=6

| | | | |
|---|---|---|---|
| I | **सामान्यनिर्देशः** | …….. | अधोलिखितं वाक्यं पठित्वा रिक्तस्थाने अव्ययपदं विलिख्य पूरयत । |
| II | **पठनाधिगमः** | …….. | गद्यभागं वाचयति । आशयं गृह्णाति । |
| III | **चिन्तानैपुणी** | …….. | प्रत्यभिजानाति । |

## प्रश्नपाठः

अधोलिखित वाक्यं पठित्वा रिक्तस्थाने अव्ययपदं विलिख्य पूरयत । (1)

( क ) तत्सर्वं विस्मृत्य आपदि एनं अनादृत्य…………नाहं समर्था । ( गच्छति , गन्तुम्, अगच्छत्)

समयः -1 निमेषाः ।

मूल्यनिर्णयसूचकाः - उचिताव्यय लेखनाय एकः अङ्कः ।

| | | | |
|---|---|---|---|
| I | **सामान्यनिर्देशः** | …….. | अधोदत्तं गद्यभागं पठित्वा कथांशं संगृह्य लिखत । प्रदत्तानां प्रश्नानाम् उत्तराणि च लिखत । |
| II | **पठनाधिगमः** | …….. | गद्यभागं पठित्वा आशयान् संगृह्य लिखति । |
| III | **चिन्तानैपुणी** | …….. | परिचितविषयमनुस्मरति । आशयान् वर्गीकरोति । |

## प्रश्नपाठः

गद्यभागं संगृह्य लिखत । (8)

भवन्तः गच्छन्तु , नाहमधुना आगच्छामि ।अस्य दयनीयाम् अवस्थां विचिन्त्य कथमेतं त्यक्त्वा गन्तुं शक्नुमः ? एषः सर्वदा अस्मान् परित्रातुं व्यग्रः आसीत् ।तत्सर्वं विस्मृत्य आपदि एतम् अनादृत्य गन्तुं नाहं समर्था । गच्छन्तु सर्वे गच्छन्तु ।

सगद्गदं पुनः पुनः विलपन्ती अन्येषां गमनं सास्त्रं पश्यन्ती तमेव गाढमाश्लिष्य - नाहं गच्छामि , नाहं गच्छामि , भवन्तं विहाय नाहं कुत्रापि गच्छामि । शारिका तूष्णीं भूत्वा तत्रैव उपाविशत् । तस्याः तप्तं मन इव दिशः अरुणिम्ना लिप्ताः । अरुणिमनि एकं दृश्यं मन्दं मन्दं स्मृतिपथमागतम् ।

सूर्योदयः ।

मातुः पक्षान्तः निद्रासुखमनुभूयमानाः वयं यथाकथञ्चित् सुप्तोत्थिताः। पितरौ भोजनमन्विष्य गतौ। तयोः आगमानकालं यावत् वृक्ष एव पितरौ। स अस्मान् पेतकानिव संरक्षति स्म।

मूल्यनिर्णयसूचकाः - संगृह्य लेखनाय 4 अङ्काः।

शीर्षकलेखनाय 1 अङ्कः।

आहत्य- 4 +1= 5.

गद्यभागं पठित्वा प्रश्नान् उत्तरयत।

१. भवन्तः गच्छन्तु नाहमधुना आगच्छामि - कस्याः वचनमिदम् ?

२ एषः सर्वदा अस्मान् परित्रातुं व्यग्रः आसीत् - कः ?

३ भोजनमन्विष्य गतौ - कौ ?

समयः - 10 निमेषाः।

मूल्यनिर्णयसूचकाः - एकैकस्य उचितोत्तरस्य एकैकमङ्कः।

आहत्य 5+3= 8

| | | | |
|---|---|---|---|
| I | **सामान्यनिर्देशः** | ........ | प्रकृतिस्नेहप्रतिपादकसूक्तीन् लिखत। |
| II | **पठनाधिगमः** | ........ | प्रकृते महत्वप्रतिपादकानि सूक्तीन् सञ्चिनोति। |
| III | **चिन्तानैपुणी** | ........ | सयुक्तिकं चिन्तयति। |

## प्रश्नपाठः

प्रदत्तान् सूक्तीन् पठित्वा प्रकृत्यनुकूलसूक्तिं चित्वा लिखत। (2)

1. मातृदेवो भव।
2. विद्या धनं सर्वधनात्प्रधानम्।
3. इमा आपः शिवाः सन्तु।

समयः - 2 निमेषौ।

मूल्यनिर्णयसूचकाः - उचितोत्तरलेखनाय - 2 अङ्कौ।

# ३. भविष्ये तव ... ।

| | | |
|---|---|---|
| I सामान्यनिर्देशः | ........ | कोष्ठकात् उचितम् उत्तरम् निर्धार्य लिखत । |
| II पठनाधिगमः | ........ | पाठभागं पठित्वा प्रश्नानम् उत्तराणि लिखत। |
| III चिन्तानैपुणी | ........ | प्रत्यभिजानाति। |

**प्रश्नपाठः**

**कोष्ठकात् उचितम् उत्तरं निर्धार्य लिखत।** (1)

१. सालारः इति कस्य नाम? (गृहस्य, नालस्य, वृद्धसदनस्य)

**समयः -** 2 निमेषाः ।

**मूल्यनिर्णयसूचकाः - इष्टतमगीतलेखनाय -** 1 अङ्कः ।

| | | |
|---|---|---|
| I सामान्यनिर्देशः | ........ | गद्यभागं पठित्वा पठकथारूपेण परिवर्तयत। |
| II पठनाधिगमः | ........ | नूतनीम् एकां पटकथां लिखति। |
| III चिन्तानैपुणी | ........ | कथातः पटकथां लिखति। (सृजनात्मकता) |

**प्रश्नपाठः** -

**गद्यभागं पठित्वा पटकथा रूपेण परिर्वत्य लिखत।** (5)

भवन्तः गच्छन्तु, नाहमधुना आगच्छामि। अस्य दयनीयाम् अवस्थां विचिन्त्य कथमेतं त्यक्त्वा गन्तुं शक्नुमः? एषः सर्वदा अस्मान् परित्रातुं व्यग्रः आसीत्। तत्सर्वं विस्मृत्य आपदि एतम् अनादृत्य गन्तुं नाहं समर्था। गच्छन्तु सर्वे गच्छन्तु।

**समयः -** 8 निमेषाः ।

**मूल्यनिर्णयसूचकाः - कथातः पटकथालेखनाय -** 3 अङ्कः ।

**क्रमीकरणस्यकृते** 2 अङ्कौ ।

**आहत्य -** 5 अङ्काः ।

| | | | |
|---|---|---|---|
| I | **सामान्यनिर्देशः** | ........ | भविष्ये तव इति पाठभागं स्मृत्वा सम्भाषणांशं पूरयत। |
| II | **पठनाधिगमः** | ........ | पाठभागं सम्भाषणरूपेण परिवर्त्य लिखति। |
| III | **चिन्तानैपुणी** | ........ | अवगतान् आशयान् विविधव्यवहाररूपेण प्रकटयति। |

## प्रश्नपाठः

**सम्भाषणांशान् पठित्वा कोष्ठकात् उचितोत्तराणि चित्वा पुनर्लिखतु।** (5)

बालकः - हे तात, अत्र सर्वे वृद्ध जनाः भवन्ति।
पिता - एतत् ................ भवति।
बालकः - मम पितामही अस्मिन् वृद्धसदने वसति वा?
पिता - आम्।
बालकः - तात! अत्र महत् ..................... वर्तते। अतः अत्र एकं .................. स्थाप्यताम्।
स्नुषा - पितामह्याः .............. कतिपयदिनाभ्यन्तरे भविष्यति। अतः ........................ आवश्यकता नास्ति। (उष्णम्, व्यजनस्य, वृद्धसदनम्, व्यजनम्, मरणम्)

**समयः - उत्तरलेखनाय** - 5 निमेषाः ।
**मूल्यनिर्णयसूचकाः- एकैकस्य उत्तरस्य एकैककाः अङ्काः**
आहत्य 5 x 1=5

| | | | |
|---|---|---|---|
| I | **सामान्यनिर्देशः** | ........ | उदाहरणानुसारं विश्लेषयत । निर्देशानुसरणं प्रश्नानामुत्तराणि लिखत। |
| II | **पठनाधिगमः** | ........ | संश्लिष्टपदानि विश्लेषयति। |
| III | **चिन्तानैपुणी** | ........ | आशयान् अवगताविषयांश्च नूतनसन्दर्भे प्रयुङ्क्ते। |

## प्रश्नपाठः

**उदाहरणानुसारं पदच्छेदं लिखत।** (1)

उदाः - मृतिस्तासाम् - मृतिः + तासाम्

ततस्तस्य - ......+.......

**समयः** -एकः निमेषः)
**मूल्यनिर्णयसूचिकाः -उचितपदविश्लेषणस्य कृते ऐकैकः –** अङ्कः)
**आहत्य** 1 X 1=1

| | | |
|---|---|---|
| I सामान्यनिर्देशः | ........ | प्रदत्तं गद्यभागं पठित्वा क्त्वान्तल्यबन्ततुमुन्नन्ताव्ययानि चित्वा लिखतु। |
| II पठनाधिगमः | ........ | पाठभागं पठित्वा प्रश्नानाम् उत्तराणि लिखति। |
| III चिन्तानैपुणी | ........ | उत्तराणि विवेचयति। |

**प्रश्नपाठः** प्रदत्तभागात् क्त्वान्तल्यबन्ततुमुन्नन्त अव्ययानि चित्वा लिखत। (3)

पाण्डवानां सन्देशं स्वीकृत्य श्रीकृष्णः दुर्योधनसभां प्रविष्टवान्। दुर्योधनः तत्र चित्रपटं दृष्ट्वा उपविष्टवान्। तस्य मनसि पाण्डवेभ्यो किमपि दातुम् **सन्नद्धता** नासित्।

**समयः - 5** निमेषाः ।

**मूल्यनिर्णयसूचिकाः - उचितोत्तरस्य कृते ऐकैकः** अङ्कः ।

**आहत्य** 3 X 1=3.

| | | |
|---|---|---|
| I सामान्यनिर्देशः | ........ | पाठभागास्थं सम्भाषणांशं स्मृत्वा प्रश्नानामुत्तराणि लिखत। |
| II पठनाधिगमः | ........ | पाठभागं पठित्वा प्रश्नानामुत्तराणि लिखति। |
| III चिन्तानैपुणी | ........ | कार्यकारणबन्धमवगच्छति। |

**प्रश्नपाठः**

लघूत्तराणि लिखत। (3)

1. प्रकोष्टे तस्मिन् महदुष्णं वर्तते - कस्य कं प्रति वचनमिदम्?
2. दिनाभ्यन्तरे मृतिस्तासाम् - कासां मृतिः? कस्य कं प्रति वचनमिदम्?
3. 'ईदृशमुष्णं सोढुं सा समर्था एव'। का समर्था? कुतः?

**समयः** - 5 निमेषाः ।

**मूल्यनिर्णयसूचकाः एकैकस्य उत्तरस्य** - 1 अङ्काः ।

**आहत्य** - 3 x 1=3

एककम्
2

# मानविकता ।

१. चिन्तारतो बालकः ।

२. को हेतुः?

३. दीनदयालुर्भव ।

# ४. चिन्तारतो बालकः।

**I सामान्यनिर्देशः** …….. कोष्टकात् उचितम् उत्तरं निर्धार्य लिखत।

**II पठनाधिगमः** …….. पाठभागं पठित्वा प्रश्नानां उत्तराणि लिखति।

**III चिन्तानैपुणी** …….. उचितस्य उत्तरस्य विवेचनं करोति। परिचितविषयम् अनुस्मरति।

## प्रश्नपाठः

**कोष्ठकात् उचितम् उत्तरं निर्धार्य लिखत।** (3)

1. क्रिस्तुभागवतस्य कर्ता कः?

   (पि. सी. कुट्टिकृष्णन्, पि.सी. देवस्या, अरणोस् पातिरी)

2. कास्मिन् नगरे शिष्या कन्यया साकं शिशुं अपूपुषत्?

   (नसरत्, ताबोर, एतन्स्)

3. तक्षकेन अनुष्ठितं व्रतं किम्?

   (उपवास, असिधारा, अहिंसा)

**समय -** 2 निमेषौ ।

**मूल्यनिर्णयसूचकाः - उचितोत्तरस्य एकैकमङ्कः -** 3 अङ्काः ।

**आहत्य** -3x1=3.

**I सामान्यनिर्देशः** …….. निर्देशानुसरणं वाक्यद्वयं योजयत।

**II पठनाधिगमः** …….. क्त्वान्त - ल्यबन्त रूपाणि उपयुज्य वाव्यद्वयं योजयति।

**III चिन्तानैपुणी** …….. कार्यकारणबन्धमवगच्छति।

## प्रश्नपाठः

**उदाहरणं पठित्वा कोष्ठके दत्तानि पदानि उपयुज्य वाक्यद्वयं योजयत।** (2)

**उदाः- विद्यालयं गच्छति। पाठं पठति।**

**विद्यालयं गत्वा पाठं पठति।**

क) स्नानं करोति । ईश्वरं वन्दते

ख) घण्डानादं श्रृणोति । कक्ष्याम् आगच्छति।

(कृत्वा, श्रुत्वा, नीत्वा)

**समय -** 4 निमेषाः ।

**मूल्यनिर्णयसूचकाः - एकैकस्य समीचीनोत्तरस्य -** 1 अङ्कः ।

**आहृत्य -**1x2=2

**I सामान्यनिर्देशः ........** श्लोकं पठित्वा गद्यक्रमं पूरयत । पदानि यथाक्रमं योजयत।

**II पठनाधिगमः ........** अन्वयं लिखति ।

**III चिन्तानैपुणी ........** आशयान् अवगच्छन्ति । पदानि यथाक्रमं योजयति।

## प्रश्नपाठः

**श्लोकं पठित्वा गद्यक्रमं पूरयत।** (2)

मेषपालैर्नीयमानं मेषयूथं निरीक्ष्य सः।

कुमारश्चिन्तयामास भाविशिष्यगणं निजम्।।

गद्यक्रमः - मेषपालैः नीयमानं मेषयूथम् - सः .............निजं ............ चिन्तयामास।

**समयः** - 4 निमेषः ।

**मूल्यनिर्णयसूचकाः - एकैकस्य समीचीनोत्तरस्य** - 1 अङ्कः ।

**आहृत्य** -1+1=2

**I सामान्यनिर्देशः** ........ उदाहरणानुसारं विश्लेषयत।

**II पठनाधिगमः** ........ संश्लिष्टपदानि विश्लेषयति।

**III चिन्तानैपुणी** ........ सन्धि ज्ञात्वा पदविश्लेषणं करोति।

## प्रश्नपाठः

**उदाहरणानुसार पदच्छेदं कुरुत।** (2)

उदाहरणम्

बालकैरन्यैः - बालकैः + अन्यैः।

1. छात्रैरन्यैः - .......... +..........।

2. मित्रैरन्यैः - .......... +..........।

**समयः -** ३ निमेषाः ।
**मूल्यनिर्णयसूचकाः - उचितपदविश्लेषणाय एकैकाङ्काः** ।
**आहत्य -** 1+1=2

**I सामान्यनिर्देशः** ........ प्रदत्तम् आशयं पठित्वा तदाशयप्रतिपादकं श्लोकं चित्वा लिखत।

**II पठनाधिगमः** ........ आशयमधिकृत्य लिखति

**III चिन्तानैपुणी** ........ श्लोकस्य आशयं अवगच्छति। श्लोकं लिखति।

## प्रश्नपाठः

**प्रदत्तं गद्यभागं पठित्वा तदाशयप्रतिपादकं श्लोकं चित्वा लिखत।** (2)

**गद्यभागः -** ज्ञानपूर्णः सः फालकः **पित्रोः अद्भुतानन्दशान्तिभिः समं अवर्धत।**

1. यहूदबालकैरन्यैः क्वापि क्रीडारतस्तथा।
   क्वापि चिन्तापरः सर्वैरलक्ष्यत स बालकः।

2. आत्मना बलवानेष ज्ञानपूर्णश्च बालकः।
   अवर्धत समं पित्रोरद्भुतानन्दशान्तिभिः।

**समयः -** 5 निमेषाः ।

**मूल्यनिर्णयसूचकाः - उचितपद्यलेखनाय -** 2 अङ्कौ ।

I **सामान्यनिर्देशः** ........ अधः प्रदत्तं पद्यं पठित्वा सूचनाम् अनूसृत्य आशयं लिखत।

II **पठनाधिगमः** ........ आशयं लिखति।

III **चिन्तानैपुणी** ........ स्वमतानुसारं व्याख्यानं लिखति।

## प्रश्नपाठः

**प्रदत्तं पठित्वा सूचनानुसारम् आशयं लिखत।** (4)

1. दृष्ट्वा चिन्तारतं क्षिप्रग्राहिणं बालकं मुनिः।

प्रियमाचष्ट नद्वृत्तं सा तु मौनमधारयत्।।

सूचनाः- आशयं,चमत्कारः

**समयः -** 5 निमेषाः ।

**मूल्यनिर्णयसूचकाः - एकैकं सूचनायै प्रत्येकं -** 2 अङ्कौ ।

**आहृत्य** -2+2=4

I **सामान्यनिर्देशः** ........ समानार्थकपदानि चित्वा लिखत।

II **पठनाधिगमः** ........ श्लोकानाम् आशयं लिखति।

III **चिन्तानैपुणी** ........ साजात्यवैजात्यान् विवेचयति।

## प्रश्नपाठः

अधो रेखाङ्कितपदानां स्थाने कोष्ठकात् समानपदानि चित्वा लिखत। (2)

1. मुनिना तेन नीतोऽसौ ताबोरद्रेरधित्यकाम्।

अशेत स्थण्डिले पश्यन् रम्याः प्रकृतिसम्पदः॥

( मनोहराः , नद्याः , पर्वतस्य )

समयः- 5 निमेषाः।

**मूल्यनिर्णयसूचकाः** - उचितोत्तरस्य लेखनाय एकैकाङ्कः।

आहृत्य - 1X2=2

| | | | |
|---|---|---|---|
| I | **सामान्यनिर्देशः** | …….. | श्लोकं पठित्वा प्रश्नानाम् उत्तराणि लिखत। |
| II | **पठनाधिगमः** | …….. | श्लोकानाम् आशयं लिखति। |
| III | **चिन्तानैपुणी** | …….. | आशयान् धारणाश्च रूपवत्करोति। |

## प्रश्नपाठः

श्लोकं पठित्वा प्रश्नानाम् उत्तराणि लिखत। (2)

" पुरे नासरथे सार्धं कन्यया प्रियया चरन्।

असिधाराव्रतं तक्षा शिशुं दिव्यमपूपुषत् "॥

1. तक्षकेण आचरितं व्रतं किम् ?
2. दिव्यं शिशुम् अपूपुषत्। कः ?

समयः - 3 निमेषाः।

मूल्यनिर्णयसूचकाः - एकैकस्य प्रश्नस्य एकैकमङ्कः।

आहत्य - 1+1=2

| | | | |
|---|---|---|---|
| I | **सामान्यनिर्देशः** | …….. | अव्ययपदान्युपयुज्य वाक्यानि रचयति। |
| II | **पठनाधिगमः** | …….. | अव्ययपदान्युपयुज्य वाक्यं रचयति। |
| III | **चिन्तानैपुणी** | …….. | सयुक्तिकं चिन्तयति। |

## प्रश्नपाठः

अधोरेखाङ्कितपदानां स्थाने उचिताव्ययपदानि कोष्ठकात् चित्वा वाक्यानि पुनर्लिखत।

1. विद्यालयं गच्छति , पाठं पठति। ( गत्वा, गच्छति , गच्छन्ति )
2. स्नानं करोति, ईश्वरं वन्दते। ( अकरोत् ,कृत्वा , कारणाय )
3. पुस्तकं पश्यति, पाठं पठति। (पश्यन् , पश्यन्ति , दृष्ट्वा )
4. घण्डानादं श्रुण्वन् ,कक्ष्याम् आगच्छति। ( श्रुणोति , श्रुत्वा , श्रुणुतः )

समयः - 5 निमेषः।

मूल्यनिर्णयसूचकाः- एकैकस्य उचितोत्तरस्य एकैकः अङ्कः।

आहत्य - 4X1=4

# ५. को हेतुः ?

**I सामान्यनिर्देशः** …….. कोष्ठकात् समुचितमुत्तरं निर्धार्य लिखत।

**II पठनाधिगमः** …….. पाठभागं पठित्वा प्रश्नानाम् उत्तराणि लिखति।

**III चिन्तानैपुणी** …….. परिचितविषयान् अनुस्मरति।

## प्रश्नपाठः

**कोष्ठकात् समुचितमुत्तरं निर्धार्य लिखत।**

'गात्रस्य वार्धक्यं अनुभूयेत खलु' गात्रमिति पदस्य - समानार्थकं पदं कोष्ठकात् चित्वा लिखत?

(कर्णं, नेत्रं , शरीरम्)

**समय** - 1 निमषः ।

**मूल्यनिर्णयसूचकाः** - **उचितोत्तरस्यः** 1 अङ्कः ।

**I सामान्यनिर्देशः** …….. प्रादेशिकभाषायां अनुवदत।

**II पठनाधिगमः** …….. आशायान्। अवगतविषयांस्च नूतनसन्दर्भे प्रयुङ्क्ते।

**III चिन्तानैपुणी** …….. सयुक्तिकं चिन्तयति।

## प्रश्नपाठः

**प्रादेशिकभाषायाम् आङ्गलेयभाषायां वा अनुवदत।** (4)

'यशोधरे! अद्याहं लोकमपश्यम्। वार्धक्यं मरणं चापश्यं, रोगं वेदनां चापश्यम्।' "साधारणम्, अनया यशोधरयापि कियद्वारं दृष्टमस्ति एतत्सर्वं। बाल्ये सुप्रबुद्धस्य पुत्रीत्वेन सरवीभिः सह विचरयत्यवसरे"।

**समय** - 8 निमषाः ।

**मूल्यनिर्णयसूचकाः** - उचितरीत्या लेखनाय : 4 अङ्कः।

| | | | |
|---|---|---|---|
| I | सामान्यनिर्देशः | …….. | प्रदत्तं विज्ञप्तिपत्रं पठित्वा प्रश्नानामुत्तराणि संस्कृतभाषया लिखत। |
| II | पठनाधिगमः | …….. | भाषान्तरीकृत्य लिखति। |
| III | चिन्तानैपुणी | …….. | सयुक्तिकं चिन्तयति। |

## प्रश्नपाठः

**प्रदत्तं विज्ञप्तिपत्रं पठित्वा प्रश्नानामुत्तराणि संस्कृतभाषया लिखत। (4)**

### സംസ്കൃതസമാജത്തിന്റെ ഉദ്ഘാടനം

ബഹുമാന്യരെ,

പട്ടം ജി.എച്ച്.എസ്. എസ്. ലെ സംസ്കൃതസമാജത്തിന്റെ ഉദ്ഘാടനം വിവിധ പരിപാടികളോടെ 19-08-2016 വെള്ളിയാഴ്ച രാവിലെ നടത്തുന്നതാണ്. സ്കൂൾ അങ്കണത്തിൽ വെച്ച് ബഹു. ജില്ലാ വിദ്യാഭ്യാസ ഓഫീസർ ശ്രീ. ശരത്ചന്ദ്രൻ ഉദ്ഘാടനം ചെയ്യുന്ന ചടങ്ങിൽ സംസ്കൃതം സ്പെഷ്യൽ ഓഫീസർ ഡോ. ടി.ഡി.സുനീതി ദേവി മുഖ്യപ്രഭാഷണം നടത്തുന്നു. ഏവർക്കും സ്വാഗതം.

**കാര്യപരിപാടികൾ**

| | | |
|---|---|---|
| പ്രാർത്ഥന | : | സംസ്കൃതവിദ്യാർത്ഥികൾ |
| അദ്ധ്യക്ഷൻ | : | ശ്രീ. ബാലകൃഷ്ണൻ മാസ്റ്റർ (പ്രധാനാധ്യപകൻ) |
| സ്വാഗതം | : | ശ്രീമതി വിഷ്ണുപ്രിയ (സംസ്കൃതാദ്ധ്യാപിക) |
| ഉദ്ഘാടനം | : | ശ്രീ. ശരത്ചന്ദ്രൻ (ജില്ലാ വിദ്യാഭ്യാസ ഓഫീസർ) |
| മുഖ്യപ്രഭാഷണം | : | ഡോ. ടി.ഡി. സുനീതി ദേവി (സംസ്കൃതം സ്പെഷ്യൽ ഓഫീസർ) |
| ആശംസകൾ | : | ശ്രീ. സന്തോഷ്മാസ്റ്റർ (മലയാളം അദ്ധ്യാപകൻ) |
| | | ശ്രീമതി. ലീജ (സ്റ്റാഫ് പ്രതിനിധി) |
| | | കുമാരി നന്ദന (സ്കൂൾ ചെയർമാൻ) |
| നന്ദി | : | മാസ്റ്റർ കിരൺ സത്യനാഥ് (ക്ലബ് സെക്രട്ടറി) |

## കാര്യപരിപാടികൾ

ഗാനം, നാടകം, സംഘഗാനം, അഷ്ടപദി മുതലയാവ

1. संस्कृतसमाजस्य उद्घाटनं कस्मिन् दिनाङ्के भविष्यति? (1)
2. समारोहकार्यक्रमे उद्घाटकः कः? (1)
3. स्वागातभाषणं **कः करिष्यति**? (1)
4. कार्यक्रमे **कानि कलाप्रकटनानि भविष्यन्ति**? (1)

**समयः** - 10 निमेषाः ।

**मूल्यनिर्णयसूचकाः - उचितोत्तरस्य** :- 4 अङ्काः ।

**आहत्य** - 4x1=4

**I सामान्यनिर्देशः** ........ **यथोचितं योजयत।**

**II पठनाधिगमः** ........ पाठभागं पठित्वा प्रश्नानामुत्तराणि लिखति।

**III चिन्तानैपुणी** ........ **सयुक्तिकं चिन्तयति।**

## प्रश्नपाठः

**यथोचितं योजयत।** (4)

1) सुप्रबुद्धस्य पुत्री - श्रीबुद्धः।
2) सिद्धार्थः - **शरीरम्**।
3) गात्रम् - सिद्धार्थस्य मित्र**म्**।
4) छन्दः - यशोधरा।

**समयः** - 5 निमेषाः ।

**मूल्यनिर्णयसूचकाः - प्रत्येकमुत्तरस्य कृते** -एकैकः अङ्कः देयाः ।

**आहत्य** – 1x4=4

**I** **सामान्यनिर्देशः** ........ संस्कृतभाषायाम् अनुवदत।

**II** **पठनाधिगमः** ........ मातृभाषातः संस्कृतभाषया अनुवदति।

**III** **चिन्तानैपुणी** ........ सृजनात्मकतया चिन्तयति।

## प्रश्नपाठः

**संस्कृतभाषया अनुवदत।** (3)

1. സത്യം തന്നെ ജയിക്കും

( Truth always wins.)

2. ദുഃഖത്തിന്റെ കാരണം ആശയാണ്.

( Desire is the cause of sorrow.)

3. ബുദ്ധന്റെ യഥാർഥപേര് സിദ്ധാർഥൻ എന്നാണ്.

( Siddhartha is the real name of Buddha.)

समयः - 5 निमेषाः।

मूल्यनिर्णयसूचकाः - उचितसंस्कृतानुवादाय - एकैकोङ्कः।

आहत्य - 1x3=3.

# ६ . दीनदयालुर्भव ।

| | | | |
|---|---|---|---|
| I | **सामान्यनिर्देशः** | ........ | यथोचितं योजयत। |
| II | **पठनाधिगमः** | ........ | समानपदान्युपयुज्य पाठभागं लिखति। |
| III | **चिन्तानैपुणी** | ........ | परिचितविषयमनुस्मरति। |

## प्रश्नपाठः

**यथोचितं योजयत।** (3)

| क | | ख |
|---|---|---|
| खिन्नः | - | श्रुत्वा। |
| चोरणं | - | संशयः। |
| निशम्य | - | दुःखितः। |
| सन्देहः | - | मुनिवर्यः । |
| संन्यासिवर्यः | - | मोषणं । |

**समयः** -5 निमेषाः ।

**मूल्यनिर्णयासूचकाः - उचितोत्तरलेखनाय एकैकः** अङ्कः ।

**आहत्य -**3x1=3

| | | | |
|---|---|---|---|
| I | **सामान्यनिर्देशः** | ........ | कोष्ठकात् समुचितम् उत्तरं निर्धार्य लिखत। |
| II | **पठनाधिगमः** | ........ | पाठभागं पठित्वा उत्तराणि लिखति। |
| III | **चिन्तानैपुणी** | ........ | परिचितं विषयमनुस्मरति |

## प्रश्नपाठः

कोष्ठकात् समुचितम् उत्तरं निर्धार्य लिखत। (3)

1. 'एका जातिः, एको धर्मः, एको देवो मनुष्यस्य '- इति केन उक्तम्? ( श्रीनारायणगुरुदेवेन, श्रीबुद्धेन , येशुदेवेन)
2. मुषित्वा - समानपदं किम्? (मोषणं कृत्वा, निवेदनं कृत्वा, ग्रहणम् कृत्वा)
3. 'गुरोरन्तर्गतं न्यायाधिपाय न्यवेदयत् ' - कः? (महाकविः कुमारनाशान्, आरक्षिजनाः, संन्यासिवर्याः)

समयः- एकैको निमेषाः।

मूल्यनिणयसूचकाः - उचितोत्तरलेखनाय एकैकः अङ्कः।

आहत्य-1+1+1=3

| | | |
|---|---|---|
| I **सामान्यनिर्देशः** | ........ | सूचनाः अनुसृत्य खण्डिकां लिखत। |
| II **पठनाधिगमः** | ........ | श्रीनारायणगुरोः सन्देशान् विशदीकरोति। |
| III **चिन्तानैपुणी** | ........ | आशयान् वर्गीकरोति। |

## प्रश्नपाठः

**स्वामिनः भूतदयालुताम् अवधार्य सः न्यायाधीशः तं चोरकल्पं स्वेच्छया गन्तुम् अनुज्ञे - ससन्दर्भं विशदयत?** (4)

**सूचना** - न्यायाधीशः चोराय एकाधिकशतं ताडनम् अदण्डयत् - गुरूः खिन्नमनस्कः अभवत् - कुमारनाशान् महोदयः गूरोरन्तर्गतं न्यवेदयत् - न्यायाधीशः चोर**म्** अमोचयत्।

**समयः -** 7 निमेषाः ।

**मूल्यनिर्णयसूचकाः -** आशयाविष्करणम् ३ भाषाप्रयोगसामर्थ्यम् २।

आहत्य - 2+3=5

| | | |
|---|---|---|
| I **सामान्यनिर्देशः** | ........ | प्रदत्तवाक्यात् क्त्वान्तल्यबन्ततुमुन्नन्तपदानि चित्वा लिखत। |
| II **पठनाधिगमः** | ........ | अव्ययपदानि उपयुज्य वाक्यानि रचयति। |
